# राजस्थान बोर्ड परीक्षा 2019-20
# 10वीं कक्षा
# तृतीय भाषा-संस्कृतम्
# मॉडल पेपर-दशम्

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

---

**परीक्षार्थियों के लिये सामान्य निर्देश :-**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत-माध्यमेन एव लेखनीयानि।

---

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

स्वशिष्यस्य गुण-गण-महिम्ना परमप्रीतः गुरुः कुशलदासः स्वजीवितकाले एव आश्रमस्य स्वामित्वं केशवानन्दाय दत्तवान् गुरुपीठे च तं प्रतिष्ठापितवान्। 'परोपकाराय सतां विभूतयः' इति धिया समृद्धमठस्य विभूतीनामुपयोगं विधाय उर्दू-प्रधाने फाजिल्का-अबोहर-क्षेत्रे राष्ट्रभाषायाः प्रचारकार्यमारब्धम्। आदौ तावद् आश्रमे एव 'वेदान्त पुष्पवाटिका' इत्याख्य-सार्वजनिक-हिन्दी-पुस्तकालयस्य वाचनालयस्य च प्रारम्भः कृतः।

पश्चात्तत्रैव एका संस्कृत-पाठशालाऽपि स्थापिता। अबोहर-नगरे 'नागरी-प्रचारिणीसभा' प्रारब्धा। जनसहयोगेन 'साहित्यसदनम्, अबोहर' इत्याख्या संस्थापि आरब्धा या हि रविन्द्रनाथठाकुरस्य शान्तिनिकेतनोपमासीत्, यन्माध्यमेन च ग्राम्यक्षेत्रेषु 25 विद्यालयानां, चलपुस्तकालयस्य, सत्साहित्य-प्रकाशनाय 'दीपक-प्रेस' इत्यस्य च स्थापना जाता। साहित्य-सदने एव स्वामिना 30 तमम् अखिलभारतीयं हिन्दी-साहित्य-सम्मेलनमपि आयोजितम्। हिन्दी-सेवार्थं स्वामिने 'साहित्य वाचस्पतिः' तथा च 'राष्ट्रभाषा-गौरवम्' इत्युपाधिद्वयं प्रदत्तम्। केशवानन्दस्य हिन्दी-प्रचार-कार्याणामेकं सुफलम् एतदासीद् यद् देशविभाजनकाले पंजाबस्य फाजिल्का-क्षेत्रं पाकिस्ताने गमनात् वारितम्।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'कर्मयोगी स्वामी केशवानन्दः' शीर्षक पाठ से उद्धृत है। इसमें स्वामी केशवानन्द के प्रेरक जीवन-वृत्त एवं शिक्षा के क्षेत्र में किए गए उनके कार्यों का वर्णन किया गया है।

**हिन्दी-अनुवाद-** अपने शिष्य के गुण-समूह की महिमा से अत्यन्त प्रसन्न गुरु कुशलदास ने अपने जीवन-काल में ही आश्रम का स्वामित्व केशवानन्द के लिए दे दिया और उनको गुरुपीठ पर प्रतिष्ठित कर दिया। "सत्पुरुषों की सम्पत्तियाँ दूसरों के कल्याण के लिए होती हैं"- इस विचार से समृद्ध मठ की सम्पत्तियों का उपयोग करके उर्दू प्रधान फाजिल्का, अबोहर क्षेत्र में राष्ट्रभाषा के प्रचार का कार्य प्रारम्भ कर दिया। सबसे पहले तो आश्रम में ही 'वेदान्त-पुष्पवाटिका' नामक सार्वजनिक हिन्दी पुस्तकालय और वाचनालय का प्रारम्भ किया। इसके बाद वहीं पर एक संस्कृत-पाठशाला भी स्थापित की। अबोहर नगर में 'नागरी-प्रचारिणी सभा' प्रारम्भ की। जन सहयोग से 'साहित्य-सदन, अबोहर' नामक संस्था भी आरम्भ की, जो रवीन्द्रनाथ ठाकुर के 'शान्ति-निकेतन' के समान थी और जिसके माध्यम से ग्रामीण क्षेत्रों में 25 विद्यालयों की, चल-पुस्तकालय की और सत्साहित्य प्रकाशन के लिए 'दीपक-प्रेस' की स्थापना हुई। साहित्य-सदन में ही स्वामीजी के द्वारा 30वें 'अखिल भारतीय हिन्दी-साहित्य-सम्मेलन' का भी आयोजन किया गया। हिन्दी-सेवा के लिए स्वामीजी को 'साहित्य वाचस्पति' और 'राष्ट्रभाषा-गौरव' ये दो उपाधियाँ प्रदान की गई। केशवानन्द के हिन्दी-प्रचार के कार्यों का श्रेष्ठ परिणाम यह था कि देश-विभाजन के समय पंजाब का फाजिल्का क्षेत्र पाकिस्तान में जाने से बचा लिया गया।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

महाराणा-प्रतापस्य छत्रपति-शिवाजिमहाराजस्य चाऽनन्तरं महाराजः सूरजमल्लः एव सः वीरः यः उत्साह-साहस-चातुरी-दृढ़तादिबलेन मुगलसाम्राज्यस्य उपरि प्रत्यक्षं प्रहारम् अकरोत्। तत्समक्षं मुगलानाम् अहंकारस्य नैकवारं पराजयः अभवत् मीरबख्शी सलावतखान-सदृशः शासकोऽपि तेन सह सन्धिं करोति यद् अद्यारभ्य अहं पिप्लवृक्षच्छेदनं-गोहननं-मन्दिरादिध्वंसनं च नैव करिष्यामि। इदं सूरजमल्लस्य प्रभावशालितायाः एकं निदर्शनम्। तदानीन्तनः न कोऽपि भारतीय-शासकः मल्लेन तुल्यः दृश्यते। अष्टादश-शताब्दस्य प्रायशः सर्वेऽपि इतिहासज्ञाः वृत्तान्त-लेखकाश्च तं मुक्तकण्ठं प्रशंसन्ति।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'महाराजः सूरजमल्लः विजयते' शीर्षक पाठ से उद्धृत है। इसमें भरतपुर के महाराजा सूरजमल्ल की प्रसिद्धि एवं उनके निर्मल जीवन-चरित्र का प्रेरक वर्णन किया गया है।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**हिन्दी–अनुवाद–** महाराणा प्रताप और छत्रपति शिवाजी महाराज के बाद महाराज सूरजमल्ल ही वह वीर था, जिसने उत्साह, साहस, चतुरता, दृढ़ता आदि के बल से मुगल–साम्राज्य के ऊपर प्रत्यक्ष प्रहार किया था। उनके सामने मुगलों के अहंकार की अनेक बार पराजय हुई। मीरबख्शी सलावत खान जैसे शासक भी उनके साथ सन्धि करते हैं कि आज से मैं पीपल के पेड़ों को काटना, गायों की हत्या और मन्दिरों का विनाश नहीं करूँगा। यह सूरजमल्ल की प्रभावशालिता का एक उदाहरण है। उस समय का कोई भी भारतीय शासक इस वीर के समान दिखाई नहीं देता है। अठारहवीं शताब्दी के प्रायः सभी इतिहासकार और कथा–लेखक उनकी मुक्तकण्ठ से प्रशंसा करते हैं।

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

नानारत्नैर्मणिभिर्युक्ताम् हिरण्यरूपां हरिपदपुण्याम्।
राधासर्वेश्वरशरणोऽहं वारं वारं वन्दे रम्याम्।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत पद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'भारत–वैभवम्' शीर्षक पाठ से उद्धृत है। मूलतः यह पाठ श्रीजी महाराज द्वारा रचित 'भारत–भारती–वैभवम्' नामक ग्रन्थ से संकलित है। इस पद्य में कवि भारत देश की विभिन्न विशेषताओं का वर्णन एवं उसकी वन्दना करते हुए कहता है कि–

**हिन्दी–अनुवाद–** विविध रत्नों और मणियों से युक्त, स्वर्णस्वरूप, भगवान् के चरणों से पवित्र और अत्यन्त रमणीय उस भारत–भूमि को मैं राधा सर्वेश्वर कृष्ण की शरण में रहता हुआ बार–बार वन्दना करता हूँ।

**अथवा**

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

पात्रापात्र–विवेकोऽस्ति धेनुपन्नगयोः इव।
तृणात्संजायते क्षीरं क्षीरात्संजायते विषम्।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत श्लोक हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'सुभाषित–रत्नानि' शीर्षक पाठ से उद्धृत है। इस श्लोक में पात्र और अपात्र के भेद को गाय और सर्प के समान बतलाते हुए कहा गया है कि–

**हिन्दी–अनुवाद–** पात्र और अपात्र का भेद गाय और सर्प के समान होता है। गाय को घास खिलाने से उससे दूध उत्पन्न होता है तथा सर्प को दूध पिलाने से उससे जहर उत्पन्न होता है।

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु–

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः।।

**उत्तरम् :**

**प्रसङ्ग–** प्रसतुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वराष्ट्र–गौरवम्' इति शीर्षकपाठाद् उद्धृतम्। मूलतः पद्यमिदं विष्णुपुराणातः संकलितम्। अस्मिन् पद्ये भारतदेशस्य भौगोलिकं स्थितिं वर्णयन् कविः कथयति यत्–

**संस्कृत–व्याख्या–** सागरस्य : उत्तरस्यां दिशि हिमालयस्य च दक्षिणस्यां दिशि भूभागः वर्तते,, सैव भागः भारतदेशः कथ्यते। अस्मिन् भारतदेशे भारतीयाः नाम सरस्वती–पुत्राः निवसन्ति। अर्थात् भारतदेशे ये वसन्ति ते भारतीयाः कथ्यन्ते।

**विशेषः–** अत्र भारतदेशस्य पौराणिकं महत्त्वं प्रदर्शयन् तस्य विष्णुपुराणानुसारेण भौगोलिकस्वरूपं दर्शितम्।

**अथवा**

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु–

प्रियवाक्य–प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।।

**उत्तरम् :**

**प्रसङ्ग–** प्रस्तुतश्लोकः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'सुभाषित–रत्नानि' इतिशीर्षकपाठाद् उद्धृतः। अस्मिन् श्लोके प्रियवाक्यथनस्य महत्त्वं वर्णितम्।

**संस्कृत–व्याख्या–** प्रियवचनस्य महत्त्वं प्रदर्शनयन् कविः कथयति यत् मधुरवाक्य–भाषणेन सर्वेऽपि प्राणिनः सन्तोषं प्राप्नुवन्ति। अत एव तादृशं मधुरवाक्यमेव वदनीयम्। मधुरवाक्यभाषणे तु कृपणता न कर्त्तव्या।

**विशेषः–** वस्तुतः मधुरभाषणेन सर्वे जनाः प्रसन्नाः भवन्ति। अतः कदापि कटुवाक्यं न कथनीयम्।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु–

**तापसी** – सर्वदमन्, शकुन्तलावण्यं प्रेक्षस्व।
**बालः** – (सदृष्टिक्षेपम्) कुत्र वा मम माता?
**उभे** – नामसादृश्येन वंचितो मातृवत्सलः।
**द्वितीया** – वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।

**उत्तरम् :**

**प्रसङ्ग–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः पाठोऽयम् 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य सप्तमांकात् संकलितः। अंशेऽस्मिन् मृत्तिकामयूरस्य विषये सर्वदमनस्य तापसीभ्यां सह वार्तालापं वर्णितम्।

**संस्कृत–व्याख्या–**

**तापसी** – सर्वदमन! शकुन्तस्य लावण्यम् अर्थात् पक्षिणः सौन्दर्यम् अवलोकय।
**बालकः** – (नेत्रम् इतस्ततः भ्रामयन्) मदीया जननी कुत्रास्ति?
**उभे (द्वयोः)** – नाम्नः समानतया मातृभक्तः बालकः वंचितो जातः।
**द्वितीया तापसी** – पुत्र! एतस्य मृण्मयूरस्य सौन्दर्यं प्रेक्षस्व, इति कथितोऽसि।

**विशेषः–** अत्र बालकः सर्वदमनः शकुन्तशब्देन सह लावण्यस्य 'ला' पदसंयोगेन 'शकुन्तला' इति सवमातुः नाम अवगच्छति।

**अथवा**

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु–

**सर्वदारः** – (राजोचितं प्रणम्य) विजयतां महाराजः।
**प्रतापः** – (दीर्घनिःश्वस्य मुखम् उन्नमय्य च) हा धिक्। विजयध्वनिं कृत्वा त्वम् अपि किम् एवं मां लज्जयसे भ्रातः।
**सर्वदारः** – प्राणाधार। किम् इदं भवान् वदति? स्वधर्माय भवता सर्वं किमपि कृतम्। स्वाधीनतायै सर्वं किमपि सोढम्। भवतः सदा एव विजयः एव भविष्यति।
**प्रतापः** – कीदृशस्तावद् विजयः? स्वदेशं परित्यक्तुं तु समुद्यतः अस्मि।

**उत्तरम् :**

**प्रसङ्ग–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दना' इत्यस्य 'स्वदेशं कथं रक्षेयम्' इतिशीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री कांकरेण विरचिता एकांकी वर्तते। अस्मिन् पाठे यवनाधिपतिना अकबरेण सह मेवाड़ाधिपतेः महाराणाप्रतापस्य युद्धवर्णनप्रसङ्गे प्रतापस्य कर्त्तव्यबुद्धिः, स्वराष्ट्रस्य स्वतन्त्रतायै दृढेच्छाशक्तिः, स्वाभिमानत्वम्, भामाशाहस्य च उदारतादयः गुणाः

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें। आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएेंगे।

वर्णिताः सन्ति। प्रस्तुतांशे साधनाभावे चिन्तितस्य प्रतापस्य सर्वदारेण सह वार्तालापं वर्णितम्।

**संस्कृत व्याख्या–**

**सर्वदारः** – (नृपोचितं प्रणामं कृत्वा) महाराणाप्रतापस्य विजयं भवतु, विजयं भवतु।

**प्रतापः** – (दीर्घं निःश्वासं त्यक्त्वा मुखम् उत्थाप्य च) हा धिक्! भ्रातः! विजयवचनैः इत्थं भवान् अपि मां लज्जायुक्तं करोति।

**सर्वदारः** – हे प्राणधार! (अस्माकं सर्वेषां प्राणानाम् आधारस्वरूपप्रतापः) भवान् इत्थं कथं कथयति? स्वस्य कर्त्तव्यपालनाय भवता सर्वमपि कृतम्। स्वतन्त्रताप्राप्त्यर्थं बहुकष्टानि भवता सहनं कृतवन्तः। अतएव भवतः सर्वदा विजयः एव भविष्यति।

**प्रतापः** – कीदृशः विजयः भविष्यति? अहन्तु स्वराष्ट्र परित्यागाय सन्नद्धोऽस्मि।

**विशेषः**– अस्मिन् नाट्यांशे महाराणाप्रतापस्य राष्ट्रं प्रति अनन्यप्रेम तथा तस्य स्वतन्त्रतायै चिन्तनं प्रकटितम्।

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु–

1. का वीणा पुस्तकधारिणी अस्ति?
2. जयन्तः कस्य सुतः अस्तिः?
3. महाराणाप्रतापस्य राज्याभिषेकः कुत्र अभवत्?
4. केशवानन्दस्य मातुः नाम किम् आसीत्?
5. 'वन्दे नितरां भारत–वसुधाम्' इत्यस्य पाठस्य रचनाकारः कः अस्ति?
6. भामाशाहः किम् आदाय प्रतापस्य समीपम् आगच्छति?
7. सुजानसिंहः कस्य अपरं नाम आसीत्?

**उत्तरम् :**

1. वीणा पुस्तकधारिणी सरस्वती अस्ति।
2. जयन्तः शक्रस्य सुतः अस्ति।
3. महाराणाप्रतापस्य राज्याभिषेकः 'गोगुन्दा' ग्रामे अभवत्।
4. केशवानन्दस्य मातुः नाम साराँ आसीत्।
5. 'वन्दे नितरां भारत–वसुधाम्' इत्यस्य पाठस्य रचनाकारः श्रीजी महाराजः अस्ति।
6. भामाशाहः धनराशिग्रन्थिम् आदाय प्रतापस्य समीपम् आगच्छति।
7. सुजानसिंहः सूरजमल्लस्य अपरं नाम आसीत्।

**निर्देशः प्रश्न संख्या 6–9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** 'भारत–भारती वैभवम्' गीतिकाव्यम् अस्ति?

**उत्तरम् :**

भारत–भारती वैभवम् कीदृशं काव्यम्?

**7.** सुरभारती शरण्या अस्ति।

**उत्तरम् :**

का शरण्या अस्ति?

**8.** दुःखसागरे तरणीयम्।

**उत्तरम् :**

कस्मिन् तरणीयम्?

**9.** सुरभारती एव वागीश्वरी।

**उत्तरम् :**

का वागीश्वरी?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु–

**उत्तरम् :**

1. गोपालसाङ्गिकः कृष्णः रामो वानरसाङ्गिकः।
   सद्भिक्षुसाङ्गिको बुद्धः महात्मानो हि साङ्गिकाः।।
2. पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
   मूढैः पाषाण–खण्डेषु रत्नसंज्ञा विधीयते।।

**11.** अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

वैदिकसाहित्यं प्रमुखतया द्विविधम् अस्ति– मन्त्ररूपः ब्राह्मणरूपश्च। मन्त्रसमुदायः एव संहिताशब्देन व्यवाह्रीयते ब्राह्मणरूपः वेदभागः संहिता भागस्य व्याख्यारूपः विद्यते। ब्राह्मणभागः यागस्वरूपबोधकः अस्ति। एषः त्रिधा विभक्तिः भवति– ब्राह्मणम्, आरण्यकम् उपनिषद् च। यज्ञस्वरूपप्रतिपादकः ब्राह्मणभागः। अरण्ये पठिताः यज्ञस्य आध्यात्मिकरूपं विवेचयन्तः वेदभागः आरण्यकानि। उपनिषदः ब्राह्मत्मबोधिकाः मोक्षसाधिकाः सन्ति। वेदस्य अन्तिमरूपतया उपनिषद् 'वेदान्तः' इत्युच्यते। ब्राह्मणभागः गृहस्थानां कृते उपयोगी, आरण्यकभागः वानप्रस्थानां कृते, उपनिषद् भागश्च संन्यस्तानां हेतो बहूपयोगी भवति।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु?
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) ब्राह्मणभागः कस्य बोधकः अस्ति?
   (ख) मन्त्रसमुदायस्य अपरं नाम किम् अस्ति?
   (ग) यज्ञस्य आध्यात्मिकं रूपं के विवेचयन्ति?
   (घ) संन्यस्तानां कृते कः बहूपयोगी भवति?
   (ङ) ब्राह्मणग्रन्थानां कति भागाः सन्ति?
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) 'ब्राह्मणभागः यागस्वरूपबोधकः अस्ति' अत्र कर्तृपदं लिखतु।
   (ख) 'वैदिकसाहित्यं प्रमुखतया द्विविधम्' अत्र विशेष्यपदं किम्?
   (ग) 'एषः त्रिधा विभक्तः भवति' अत्र 'एषः' सर्वनामस्थाने संज्ञापदं लिखतु?
   (घ) आरण्यकानि कुत्र पठितानि भवन्ति?

**उत्तरम् :**

1. वैदिकसाहित्यम्।
2. (क) यागस्वरूपबोधकः।
   (ख) संहिता।
   (ग) आरण्यकानि।
   (घ) उपनिषद्भागः।
   (ङ) त्रिधा।
3. (क) ब्राह्मणभागः।
   (ख) वैदिकसाहित्यम्।
   (ग) ब्राह्मणभागः।
   (घ) अरण्ये।

**12.** अधोलिखितपदयोः संधिविच्छेदं कृत्वा संधेः नामापि लिखतु। 2

1. मात्रंशः
2. वागीशः

**उत्तरम् :**

1. मातृ + अंशः (यण् संधि)।
2. वाक् + ईशः (जश्त्व संधि)।

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु।

1. नदी + ईशः 1
2. सदा + एव 1

**उत्तरम् :**

1. नदीशः (दीर्घ सन्धि)

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

2. सदैव (वृद्धि सन्धि)

**14.** अधोलिखितवाक्येषु रेखांकितसमस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामानि लिखत–

1. अहं कृष्णसर्पम् अपश्यम् 1
2. तत्र शिवः च केशवः च पठतः 1
3. सः प्रतिमासम् आगच्छति 1

**उत्तरम् :**

1. कृष्णं सर्पम् इति, कर्मधारयसमासः।
2. शिवकेशवौ, द्वन्द्वसमासः।
3. मासं मासं प्रति, अव्ययीभावसमासः।

**15.** निम्नलिखितवाक्येषु रेखांकितपदेषु प्रयुक्तविभक्तिं तत् कारणं च लिखत–

1. सा तस्मै भोजनं ददाति। 1
2. तेन सह अहम् अपि पठिष्यामि। 1
3. राजपुरुषात् चौरः पलायते। 1

**उत्तरम् :**

1. चतुर्थी विभक्तिः, 'दा' (दानार्थे) धातुयोगे।
2. तृतीया-विभक्तिः, 'सह' योगे।
3. पञ्चमी-विभक्तिः, पृथक्योगे।

**16.** कोष्ठकेषु प्रदत्त-प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. ताः .......... सन्ति। (बालक + टाप्) 1
2. .......... वृत्तिं धारयन्ति। (धर्म + ठक् + ङीप्) 1

**उत्तरम् :**

1. बालिकाः।
2. धार्मिकीम्।

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. सः धनं लभमानः तत्र गतः। 1
2. अस्माभिः परस्परं स्नेहेन वसितव्यम्। 1

**उत्तरम् :**

1. लभ् + शानच्।
2. वस् + तव्यत्।

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| **मञ्जूषा–** बहिः, सहसा, वृथा, एव |
|---|

1. वयं .......... कार्यं न कुर्याम। 1
2. कृष्णः .......... उद्याने न भ्रमति। 1
3. कोटरात् .......... सर्पः आगच्छति। 1

**उत्तरम् :**

1. वयं सहसा कार्यं न कुर्याम।
2. कृष्णः वृथा उद्याने न भ्रमति।
3. कोटरात् बहिः सर्पः आगच्छति।

**निर्देशः– प्रश्नसंख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** मम मित्रं फलं खादति। 1

**उत्तरम् :**

मम मित्रेण फलं खाद्यते।

**20.** तेन दुग्धं पीयताम्। 1

**उत्तरम् :**

सः दुग्धं पिबतु।

**21.** रामः क्रन्दति। 1

**उत्तरम् :**

रामेण क्रन्द्यते।

**22.** घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–





1. सः .......... विद्यालयं गच्छति। 1
2. जनकः .......... वादने जयपुरं गमिष्यति। 1

**उत्तरम् :**

1. सः **दशवादने** विद्यालयं गच्छति।
2. जनकः **सपादचतुर्** वादने जयपुरं गमिष्यति।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. आशीर्वादाः रक्षां करोति। 1
2. ते नार्यः हसन्ति। 1
3. त्वं गृहं गच्छामि। 1

**उत्तरम् :**

1. आशीर्वादाः रक्षां कुर्वन्ति।
2. ताः नार्यः हसन्ति।
3. त्वं गृहं गच्छसि।

**24.** भवतः नाम दिपांशुः। भवान् छात्रावासे निवसति। आगरा स्थितं ताजमहलं द्रष्टुकामः शैक्षिक भ्रमणाय गन्तुं भवान् इच्छति तदर्थं धनप्रेषणाय पितरं प्रति पत्रं लिखत।

**उत्तरम् :**

विद्याभवन छात्रावासः
गंगापुर नगरम्

परमादरणीयाः पितृमहाभागाः
सादरं प्रणामाः।

भवतां कृपया अत्र कुशली अहम्। सविनयं निवेदनं यद् मम वार्षिकी परीक्षा समाप्ता जाता। मम उत्तरपत्राणि शोभनानि अभवन्। अस्मिन् ग्रीष्मावकाशे अहं गृहं नागमिष्यामि, यतः विद्यालयेन एकस्याः शैक्षिकयात्रायाः आयोजनं कृतम्। एषा आगरायाः ताजमहलं द्रष्टुम् आयोजिता अस्ति। अतः यात्रा व्ययार्थं सहस्रमेकं रुप्यकं प्रेषयन्तु भवन्तः। शेषं सर्वं कुशलम्। मात्रे अग्रजाय मम प्रणामाः अनुजाय निमेशाय च आशिषः वक्तव्यः।

दिनांकः– 05.09.20...

भवदीयः प्रियपुत्रः
दिपांशुः

**अथवा**

**24.** स्थानान्तरण प्रमाण-पत्रं प्राप्तुं प्रधानाचार्यः प्रति प्रार्थना पत्र मंजूषायां प्रदत्तैः शब्दैः पूरयत्।

| **मंजूषा–** लिपिकः, पठिष्यामि, अधुना, दौसानगरम्, भरतपुरम्, परिवारः, प्रदाय, विद्यालयात् |
|---|

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें।
आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

सेवायाम्
श्रीमन्तः प्रधानाचार्यमहोदयाः,
राजकीय उच्च माध्यमिक विद्यालयः,
................।

**विषय**– स्थानान्तरण प्रमाण–पत्रं प्राप्तुं प्रार्थना–पत्रम्।

महोदयाः,

सविनयं निवेदनम् अस्ति यत् मम पिता अत्र .......... अस्ति। .......... तस्य स्थानान्तरणं ........... अभवत्। मम ............ मम पित्रा सह भरतपुरम् गमिष्यति। अहम् अस्मात् ........... नवमकक्षाम् उत्तीर्णवान्, दशमकक्षायाम् अहं भरतपुरे ...........। अतः मह्यं स्थानान्तरण–प्रमाण–पत्रं ........... अनुग्रहीष्यन्ति भवन्तः इति।

सधन्यवादम्।

दिनांकः– 03.09.20.... भवदाज्ञाकारी शिष्यः
अंश शर्मा
कक्षा 10 (स)

**उत्तरम् :**

सेवायाम्
श्रीमन्तः प्रधानाचार्यमहोदयाः,
राजकीय उच्च माध्यमिक विद्यालयः,
दौसानगरम्।

**विषय**– स्थानान्तरण प्रमाण–पत्रं प्राप्तुं प्रार्थना–पत्रम्।

महोदयाः,

सविनयं निवेदनम् अस्ति यत् मम पिता अत्र लिपिकः अस्ति। अधुना तस्य स्थानान्तरणं भरतपुरम् अभवत्। मम परिवारः मम पित्रा सह भरतपुरम् गमिष्यति। अहम् अस्मात् विद्यालयात् नवमकक्षाम् उत्तीर्णवान्, दशमकक्षायाम् अहं भरतपुरे पठिष्यामि । अतः मह्यं स्थानान्तरण–प्रमाण–पत्रं प्रदाय अनुग्रहीष्यन्ति भवन्तः इति।

सधन्यवादम्।

दिनांकः– 03.09.20.... भवदाज्ञाकारी शिष्यः
अंश शर्मा
कक्षा 10 (स)

**25.** मंजूषायाः उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवसविषये संवादं पूरयतु।

**मञ्जूषा**– कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमः, शक्नोमि, अस्माकम्, योगदिवसे, अन्तराष्ट्रिययोगदिवसेः

**पुत्र** – भोः पितः! .......... 29 दिनांके कः दिवसः भवति?
**पिता** – अरे! तस्मिन् दिने तु ........... भवति।
**पुत्र** – योगदिवसे के ............ भवन्ति?
**पिता** – ........... विश्वेजनाः प्राणायामं व्यायामं च कुर्वन्ति।
**पुत्र** – योगेन .......... स्वास्थ्यं सम्यक् भवति वा?
**पिता** – आम्। ये योगं .......... ते रुग्णाः न भवन्ति।
**पुत्र** – तर्हि अहम् अपि योगं कर्तुं ........... वा?
**पिता** – किमर्थं न, .......... आवां योगं करवाव।

**उत्तरम् :**

**पुत्र** – भोः पितः! जूनमासस्य 29 दिनांके कः दिवसः भवति?
**पिता** – अरे! तस्मिन् दिने तु अन्तराष्ट्रिययोगदिवसेः भवति।
**पुत्र** – योगदिवसे के कार्यक्रमः भवन्ति?
**पिता** – योगदिवसे विश्वेजनाः प्राणायामं व्यायामं च कुर्वन्ति।
**पुत्र** – योगेन अस्माकम् स्वास्थ्यं सम्यक् भवति वा?
**पिता** – आम्। ये योगं कुर्वन्ति ते रुग्णाः न भवन्ति।
**पुत्र** – तर्हि अहम् अपि योगं कर्तुं शक्नोमि वा?
**पिता** – किमर्थं न, आगच्छ आवां योगं करवाव।

**26.** अधोलिखितषड्वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4

1. नूतन गीत गाती है।
2. हम सब खाना खाते हैं।
3. वह दूध पीए।
4. प्रातः भ्रमण करना चाहिए।
5. मुझे प्रतिदिन दूध पीना चाहिए।
6. रमेश घर चला गया।

**उत्तरम् :**

1. नूतन गीतं गायति।
2. वयं भोजनं खादामः।
3. सः दुग्धं पिबतु।
4. प्रातः भ्रमणं कुर्यात्।
5. अहं प्रतिदिनं दुग्धं पिबेयम्।
6. रमेशः गृहं अगच्छत्।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया षड् वाक्यानि रचयतु–

**मञ्जूषा**– वृक्षारोपणम्, वृक्षेभ्यः, प्राप्स्यामः, सत्पुरुषाः, फलानि, खादन्ति



**उत्तरम् :**

1. अस्मिन् चित्रे छात्राः वृक्षारोपणं कुर्वन्ति।
2. वृक्षेभ्यः बालकाः जलं ददति।
3. वयं वृक्षेभ्यः प्राणवायुं फलानि च प्राप्नुमः।
4. यदां वयं वृक्षारोपणं करिष्यामः तदा तेभ्यः सर्वमपि प्राप्स्यामः।
5. सत्पुरुषाः कदापि वृक्षाणां कर्तनं नैव कुर्वन्ति।
6. जनाः वृक्षेभ्यः फलानि प्राप्नुवन्ति, खादन्ति च।

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत– 3

**मञ्जूषा**– महत्वम्, अनुशासनस्य, परमावश्यकम्, देशः, जनाः, लभते, ।

.......... मानव–जीवने विशिष्टं .......... अस्ति। अनुशासेन .......... महान् भवति। छात्रजीवने अनुशासनं .......... अस्ति। अनुशासनेन

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

विना साफल्यं न ..........। अनुशासिताः .......... प्रशंसनीयाः। अतः अस्माभिः अनुशासिताः भवितव्यम्।

**उत्तरम् :**

अनुशासनस्य मानव-जीवने विशिष्टं महत्वम् अस्ति। अनुशासेन देशः महान् भवति। छात्रजीवने अनुशासनं परमावश्यकम् अस्ति। अनुशासनेन विना साफल्यं न लभते। अनुशासिताः जनाः प्रशंसनीयाः। अतः अस्माभिः अनुशासिताः भवितव्यम्।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु।

1. एकदा सः जाले बद्धः।
2. मूषकः परिश्रमेण जालम् अकृन्तत्।
3. एकस्मिन् वने एकः सिंहः वसति स्म।
4. सिंहः जालात् मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।
5. तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।
6. सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।

**उत्तरम् :**

1. एकस्मिन् वने एकः सिंहः वसति स्म।
2. एकदा सः जाले बद्धः।
3. सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
4. तदा तस्य स्वरं श्रुत्वा एक मूषकः तत्र आगच्छत्।
5. मूषकः परिश्रमेण जालम् अकृन्तत्।
6. सिंहः जालात् मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।

*******

सत्र 2020-21 से नये पाठ्यक्रमानुसार सभी कक्षाओं के सभी विषयों की टेक्स्ट बुक एवं सभी प्रकार की सहायक अध्ययन सामग्री विद्यार्थियों को मोबाइल पर व्हाट्सएप द्वारा एवं वेबसाइट www.rbse.online पर उपलब्ध करवायी जाएगी। इसके लिये विद्यार्थियों से किसी भी प्रकार का कोई शुल्क नहीं लिया जाएगा। इसके लिये विद्यार्थियों को किसी भी प्रकार का कोई OTP Verification या Email द्वारा Verification नहीं देना होगा। हमारा व्हाट्सएप नम्बर जानने या अन्य किसी भी प्रकार की जानकारी के लिये वेबसाइट www.rbse.online पर विजिट करें।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें। आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।